# Appendix 01

## Daśa Śloki of Nimbārkācārya

**श्रीनिम्बार्काचार्य विरचितं-दशश्लोकी कामधेनु।**

ज्ञानस्वरूपं च हरेरधीनं,
शरीर-संयोग-वियोग-योग्यम्।
अणुं हि जीवं प्रतिदेहभिन्नं
ज्ञातृत्ववन्तं यदनन्तमाहुः ॥१॥

अनादि-माया-परियुक्तरूपं
त्वेनं विदुर्वै भगवत्प्रसादात्।
मुक्तं च बद्धं किल बद्ध-मुक्तं
प्रभेद-बाहुल्यमथापि बोध्यम्॥२॥

अपाकृतं प्राकृतरूपकं च
कालस्वरूपं तदचेतनं मतम्।
माया-प्रधानादि-पद-प्रवाच्यं
शुक्लादिभेदाश्च समेऽपि तत्र॥३॥

स्वभावतोऽपास्तसमस्तदोष
मशेषकल्याणगुणैकराशिम्।
व्यूहाङ्गिनं ब्रह्म परं वरेण्यं
ध्यायेम कृष्णं कमलेक्षणं हरिम्॥४॥

अङ्गे तु वामे वृषभानुजां मुदा
विराजमानामनुरूपसौभगाम्।
सखीसहस्रैः परिसेवितां सदा
स्मरेम देवीं सकलेष्ट कामदाम्॥५॥

उपासनीयं नितरां जनैः सदा
प्रहाणयेऽज्ञानतमोऽनुवृत्तेः।
सनन्दनाद्यैर्मुनिभिस्तभोक्तं
श्रीनारदायाऽखिलतत्त्वसाक्षिणे ॥६॥

सर्वंहि विज्ञानमतो यथार्थकं
श्रुतिस्मृभ्यो निखिलस्य वस्तुनः।
ब्रह्मात्मकत्वादिति वेदविन्मतं
त्रिरूपताऽपि श्रुति-सूत्र-साधिता ॥७॥

नाऽन्या गतिः कृष्णपदारविन्दात्
संदृश्यते ब्रह्म-शिवादि-वन्दितात्।
भक्तेच्छयोपात्त-सुचिन्त्य-विग्रहाद
चिन्त्य-शक्ते रविचिन्त्यसाशयात् ॥८॥

कृपास्य दैन्यादियुजि प्रजायते
यया भवेत्प्रेममविशेषलक्षण।
भक्तिर्ह्यनन्याधिपतेर्महात्मनः
सा चोत्तमा साधन रूपिकाऽपरा ॥९॥

उपास्य रूपं तदुपासकस्य च
कृपा-फलं भक्ति रसस्ततः परम्।
विरोधिनो रूपमथैतदाप्तेर्ज्ञेया
इमेऽर्था अपि पञ्च साधुभिः ॥१०॥

✠✠✠✠✠